SS-4
वेदकालीना नारी।

Dr. P. Indira
RSSBUGVR Campus, Puranattukara,
Thrissur-680 551

एको वशी सर्वभूतान्तरात्मा
एकं रूपं बहुधा यः करोति।
तमात्मस्थं येऽनुपश्यन्ति धीरा-
स्तेषां सुखं शाश्वतं नेतरेषां । इति।

तथा ब्रह्मविदाप्नोति परं, 'ब्रह्मवित् ब्रह्मैव भवती'त्यादि श्रुत्याऽद्वैतज्ञानस्यैव नित्यनिरतिशयानन्दरूपमोक्षसाधनत्वं सिद्धम्। नैसर्गिकी खलु प्राणिनां सर्वेषां सुखप्रेप्सा दुःखपरिजिहीर्षा च। यद्यपि सुखमात्मरूपतया नित्यप्राप्तं तथाप्यनिर्वचनीयानाद्यविद्यया मनुष्याः सांसारिकसुखाभासप्राप्तये अनेककर्मण्याचरन् तज्जनित सुखदुःखेऽनुभवन् संसारसागरे निमज्जन्ति। अतः सर्वानर्थहेतुरात्मानवबोध इति नित्यनिरतिशय सच्चिदानन्दरूपयोर्जीवब्रह्मणोरैक्यरूप शुद्धचिन्मात्रगोचरनिर्विकल्पकसाक्षात्काराय सर्वैः प्रयत्नः करणीयः। वैज्ञानिकेऽस्मिन् युगे मनुष्याः यान्त्रिको भूत्वा भावमण्डलस्य जाड्येन नितरामशान्तिमनुभवन्ति। पुरुषार्थेषु अर्थकामयोश्च प्राधान्यमिति धिया कुत्सितकर्माण्यपि कुर्वन्ति। आध्यात्मिकविकासस्यानिवार्यतायामस्मिन् सन्दर्भे विश्वसंस्कृतेर्विकासाय वेदोपनिषदादि सुरभारती ग्रन्थेषु या संस्कृतिर्निगूढा वर्तते तदुपयोगिता नितरामपेक्षिता अस्ति। "कृण्वन्तो विश्वमार्यम्" 'यत्र विश्वं भक्त्यकनीडम्' इत्याद्याशयाः अस्माकं देशे पुरातनकालादेव प्रस्फुटा वर्तन्ते।

ज्ञानतपसापूतैः महर्षिभिः संवर्धिता वेदानाधारीकृत्यप्रवर्तिताः भारतीयसंस्कृति सांसारिकदुःखपीडितान् सर्वव्याधिहरं पीयूषमिव अद्यापि विलसति। भारतीय धर्मदर्शनयोश्च प्रवृत्तिः ब्रह्माभिमुखीकरणं भवति। भूतजातस्य विषये 'सर्वे भवन्तु सुखिनः' इति भारतीयसंस्कृतेर्सनातनोऽनन्योपदेशः 'मा हिंस्यात् सर्वभूतानि' इति वेदवाक्येन सामञ्जस्यमुक्तवन्तः वेदऋषयः। 'आचारः परमो धर्मः', 'मातृदेवो भव', 'आचार्यदेवो भव' इत्यादि वाक्यैः तत्वानुभूतिं कुर्वन्नेव ते वेदमनीषिणः तत्वशास्त्राण्यवर्धयन्। सर्वधर्माणामेकत्वमिति सनातनधर्मः भारते प्रकाशते। "प्रवृत्तिश्च निवृत्तिश्च पुंसां येनोपदिश्यते।
तद्धर्माश्चोपदिश्यन्ते शास्त्रं शास्त्रविदो विदुः"।। इति लक्षणमनुसृज्य वेदादीनां शास्त्रत्वं सिद्धमेव।

समस्यासंकुलेऽस्मिन् युगे स्त्रीस्वातन्त्र्यमधिकृत्य चर्चाः प्रचलन्ति। पुरुषसमत्वमिच्छन्तीनां स्त्रीणां धार्मिकरोषाग्निस्फुलिङ्गाः इतस्ततः ज्वलन्ति च। अस्मिन्सन्दर्भे आर्षभारतसंस्कृत्यां, स्त्रीणां कृते कियदुत्कृष्टं स्थानं कल्पितमासीत् समाजव्यवस्थितीनां सुस्थित्यर्थं कीदृशीस्त्रीत्वकल्पना आदर्शरूपत्वेन स्वीकृतमासीत्, तथा आर्षसंस्कृतिनिर्माणे, संरक्षणे च तेषां योगदानं किमित्यादि विषयमधिकृत्य विचिन्तनं वेदशास्त्रविचारसभायामस्मिन्नुचितमिति मन्ये।

आर्यसंस्कृतिनिर्माणे संवर्धने च स्त्रीणां महत्वपूर्णं स्थानं विद्यत एव। गृहजीवने, समाजसेवने, राष्ट्रजीवने च तस्याः प्रभावः अन्यादृशमेव। 'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता' इति मनुस्मृतिवाक्यं स्मरणीयमेव। यत्र स्त्रियः सुखिन्यः भवन्ति तत्र देवता निवासं कुर्वन्ति। तत्रैश्वर्यसमृद्धिरपि भवन्ति।

संस्कृतभाषायां नारीवाचकाः बहवः शब्दाः सम्मानसूचकाः पावित्र्यसूचकाः च सन्ति। यस्यारिं-विद्यते सा नारी। नरं उपकरोति सा नारी। नृत्यवत् सानन्दं स्वकर्तव्यं करोति सा नारी इत्यादि।

अस्माकं राष्ट्रे स्त्रीणां उन्नतमुदात्तञ्च जीवनं प्रथमतया ऋग्वेदकाले दृश्यते। तत्र स्त्रीपुरुषाणां स्पृहणीयरूपा समता दृश्यते। संराज्ञी श्वशुरे भव संराज्ञी श्वसुवां भव ननान्दरि संराज्ञि भव संराज्ञी अधिदेवृषु। इत्यादिना स्त्रीणां गृहसंराज्ञीत्वं सूचितम्। सामाजिकेषु धार्मिकेषु च सर्वेषु कार्येषु पत्नी पत्युः सहधर्मचारिणी आसीत्।

ऋग्वेदकाले न केवलं गृहजीवनमेव स्त्रीजनस्य ध्येयमासीत्, अध्ययनं, अध्यापनं, ब्रह्मचर्या तपस्या गृहस्थाश्रमं वा यथारुचि स्वीकर्तुं नारी समर्था आसीत्। प्राचीनभारते अध्ययनमित्यनेन वेदवेदाङ्गानामध्ययनमेवोद्दिष्टमासीत्। तथापि स्त्रीणामध्ययने स्वातन्त्र्यं दत्तमासीदिति नारीऋषीणां परामर्शेन ज्ञातुं शक्यते- एतादृशी नारी ब्रह्मवादिनी इति नाम्ना पूजिता सम्मानिता चासीत्। आत्रेयी, मैत्रेयी, गार्गी सुलभादीनां नारीणां नामानि उपनिषत्कालं पुराणकालञ्च भूषयन्ति। ते यज्ञकार्यसम्पादनं शास्त्रार्थज्ञानञ्च सम्यगवगम्य वेदप्रचारकर्मे व्यापृता च आसन्। ऋग्वेदमन्त्रद्रष्टुषु घोषालोपामुद्रा ममतोपाला- सूर्या- इन्द्राणी शचीसर्पराज्ञी विश्ववारा च प्रामुख्येन आसन्। नारीऋषीणां प्रतिष्ठा विषये उक्तमस्ति - यत्- "यथासिन्धुर्नदीनां साम्राज्यं सुषुवे वृषा एवं त्वं सम्राज्ञेधि पत्युरस्तं परेत्य च।"
मेक्डोनाल् महोदयोऽभिप्रैति यत् विश्ववारा न केवलं एकानारीऋषिः किन्तु सा एका ऋत्विक्त्वेन बहूनां यज्ञानामाधानमध्यकरोत् इति।

वेदमन्त्रपठनपूर्वकं ब्रह्मचर्याश्रमप्रवेशात्पूर्वञ्च उपनयन संस्कारो विधीयते। ब्रह्मचारिण्योऽपि भिन्नभिन्नशाखानुसारं उपनयनविधिं स्वीकृत्य बौद्धिकविकासार्थं पुरुषब्रह्मचारिवत् अध्ययनमकुर्वन्निति ज्ञातं भवति। स्त्रीणामपि यज्ञोपवीतधारणेऽधिकारो आसीत् इति गोभिलगृह्यसूत्रे उक्तम्। पत्न्या साकमेव पुरुषः यज्ञानुष्ठानं कर्तुं समर्थः आसीत्। शतपथ ब्राह्मणे उक्तं - "अयज्ञियो वा एव योऽपत्नीकः" इति। यज्ञकर्मणि द्वयोः भागभागित्वं अनिवार्यम् - 'या दम्पती सुमनसा सुनुत आच धावतः देवा सो नित्यायाशिशः' इति ऋचोक्तिरस्ति। पत्नीति शब्द एव यज्ञकर्मणि पत्या सह सम्बन्धं प्रकटयति। 'पत्युर्नो यज्ञसंयोगे'-इति अलतेकरमहाभागः एवं चतुर्विधयज्ञानुष्ठानस्य सम्पादनं केवलं नार्यः कुर्वन्ति स्मेति प्रस्तूयते

ब्रह्मवादिनी सद्योद्वाहा इति स्त्रीच्छात्राणां भेदद्वयमासीत् वेदकाले। केचित् ब्रह्मवादिन्यः आजीवनं ब्रह्मचर्याव्रतं स्वीकृत्य वेदाध्ययन-अध्यापनादिषु च निरता भूत्वा आध्यात्मिकज्ञानप्रकाशस्य प्रस्फुरणे जागरूकाः सत्यः समाजस्योन्नमनार्थं प्रवृत्ताः दृश्यन्ते। अध्यापनकार्ये नियुक्तानां विदुषीणां कृते उपाध्याया इति पदं रूढमासीत् - मण्डनमिश्रस्य सन्यासस्वीकारानन्तरं तस्य पत्नी श्रृङ्गगिरौ अध्यापनकर्मणि नियुक्ता। भारत्या शिक्षितः शिष्यसम्प्रदायः 'भारती ' नाम्ना प्रसिद्धः इति श्रूयते। स्वभर्तुर्याज्ञवल्क्यस्य सन्यासस्वीकारसमये मैत्रेय्याः एवमुक्तम् 'अमृतत्वं यद्धनेन लभ्यते तदेवाहं वाच्छामि नेतराणि नश्वरभोगदायीनि लौकिकवित्तानि अहं न कामये, अमृतत्वसाधनत्वेन यद्भवान् वेद तद् एव मे ब्रूहि' -इति। आत्मज्ञानाभिलाषिणं स्वपत्नी 'न वा अरे पत्युः कामाय पतिः प्रियो भवति',..... इत्यादि ब्रह्मतत्वम् उपदिशति याज्ञवल्क्यः। मर्त्यजीविते सर्वदुःखकारणभूतं भवति कर्मपाशमिति ज्ञात्वा वैराग्ययुक्ता सति स्वगुरुभूतपतिमुखादेव तत्ज्ञात्वा न केवलं कायस्यार्धं किन्तु याज्ञवल्क्यस्य आत्मानमपि स्वायत्तीचकार।

एवं बृहदारण्यकोपनिषदि तृतीयाध्यायस्य षष्टब्राह्मणे प्रथमं तावत् वाचक्नवी गार्गी विद्वत्सम्मेलने याज्ञवल्क्यं साक्षादन्तर्यामिनं मुख्यात्मानमधिकृत्य पृच्छति। तदनन्तरं अष्टमब्राह्मणेऽपि ध्वनिमाश्रित्य वक्रोक्तिभङ्ग्या याज्ञवल्क्यस्य ब्रह्मविद्याकोविदत्वं सुस्थापयितुं कालमाश्रित्य पृच्छति। प्रश्नकर्तुः अनितरसाधारणपाण्डित्यवैभवं तत्र प्रकटयति च। एवं भूताः स्त्रियः ललनालालामभूताः इत्यत्र नास्ति संशयः। स्त्रीणां वैदुष्यसम्पादनं पण्डितसदसि तस्याः सम्मानं स्थानं च कीदृशमासीदिति तत्प्रसङ्गादवानुमातुं शक्यते।

न केवलं प्रज्ञोपज्ञरूपशास्त्रसरण्यां, किन्तु प्रतिभोद्गमरूपसाहित्यसरण्यामपि स्त्रीणां योगदानं वेदकाले दृश्यते। ऋग्वेदे विंशति सख्यकानां कवयित्रीणां वर्णनं कृतं दृश्यते। तांसु विश्ववारा-सिकता निवावरी-घोषा-रोमशा-लोपामुद्रा-अपालादयः प्रमुखाः।

सद्योद्वाहायामपि अनेकानि कर्तव्यानि निक्षिप्तनि। यतः भारतीयसंस्कृतौ कुटुम्बस्य तथा कुटुम्बबन्धानाञ्च प्राधान्यमतितरां वर्तते। श्रेष्ठाः ऋषीश्वराः सर्वे गृहस्थाश्रमं स्वीकृतवन्तः आसन्। समानचिन्तायुक्ताः अर्धनारीश्वररूपेणावस्थिताः नार्य इन्द्रियनिग्रहेण परिमितभोगिन्यः भूत्वा अपरिमितत्यागमाचरितवत्यः दृश्यन्ते। दुर्जयं इन्द्रियशत्रुं जेतुं सहायभूता गृहिण्यः पत्युः प्रेमातिरेकपात्राणि सञ्जाताः। कृतज्ञतापूर्वकादरः पतिपत्न्योर्मिथः आवश्यक इति तैः सुव्यक्तीकृतम्। आदरःआदानप्रदानेन च भाव्यम्। दधार क्षेमयोको न रण्वाः इति ऋग्वेदीयमन्त्रभागेन धर्माचरणाय, उद्बोधनाया च गृहमिव पवित्रं उत्तमञ्चोपाधिः नान्यदस्तीति सत्यमेव वेदऋषिणा प्रोक्तम्। गृहजीवितं ईश्वरसदृशं भवति। ईश्वरं सर्वाश्रयभूतगृहमिव दृष्टव्यञ्च।

विवाहमण्डपे स्थितां नवोढां वधूं प्रति उपदेशरूपा इयमुक्तिः तदानीन्तन स्त्रीत्वकल्पनां प्रति प्रकाशं प्रस्फुरति।

अघोरचक्षुरपतिघ्येधि शिवा पशुभ्यः सुमना सुवर्चाः ।
वीरसूर्देवकामास्योना शनोभवाद्विपदेशं चतुष्पदे।।
– 10 - 7 - 85 - 44

शान्तता तथा सौम्यता च स्त्रीस्वभावे स्वतः सिद्धौ द्वौ भावौ स्तः। तयोः त्यागः कदापि न करणीयम्। गृढरूपेण स्थिता - भावद्वयञ्चेका त्यागस्य सर्वं सहत्वस्य च, अपरा भोगासक्तेः सर्वनाशस्य च भवति। एषु प्रथमभावस्य प्रतिरोद्धशक्त्या द्वितीयभावस्यबहिरागमनं निरोद्धव्यम्। अत एवोक्तं अधोरचक्षुः इति। क्रोधेन घोरचक्षुषत्वं त्वयि न भवेत् - क्रोधात् सम्मोहः सम्मोहात् स्मृतिभ्रमः, बुद्धिनाशः सर्वनाशः च, भविष्यति। यदि गृहान्तरीक्षं कलुषितं भवेत् तदा गृहं नरकसदृशं भवतीयत्र संशयलेशोऽपि नास्ति। निरन्तरं स्वेच्छापूर्त्यर्थं भर्तारं न पीडयेत्। स्त्रीत्वसहजवश्यशक्त्या भर्तुः मानसिकसंघर्षाणां दूरीकरणे साहाय्यमाचरितुं तथा दुष्प्रवृत्तान्निवर्तयितुं शक्ता भवति नारी। अत एवोक्तं अपतिघ्नी इति। मातृभावेन सर्वं पश्यन्ती सद्गुणयुक्ता स्त्री। यथाऽस्माकं मनः तथेवेदं लोकमस्माभि प्रतीयते। मनसि सद्गुणसम्पन्नता वर्तते चेत् तत्तेषां मुखे तेजोरूपेण प्रकाशते। अत एवोक्तं – सुमनाः सुवर्चाः ऐधि इति। वधू वीरसू च भवितव्यम्। सत्सन्तानलाभेनैव जन्मसाफल्यं न तु सन्तानलाभेन। धर्माचरणव्यग्राणां सत्सन्तानानां जननीत्वेन त्वं श्लाघनीया भवेत्। एवं भूता स्त्री देवकामा च भवेत्। समस्तकर्मं ईश्वरार्पणबुद्ध्या क्रियते चेत् देवकामा भवति सा। एवं भूता नारी स्वगृहे, देशे, राज्ये च प्रशंसीभूता भवति। सर्वलोकेषु ईश्वरांशदर्शनेन सुखरूपत्वेन सर्वं पश्यन्तीनां तेषाम् अस्वतन्त्रता कुतः? निरतिशयानन्दरूपस्य चिन्मये हृदि परमा भक्ति चेत् अस्वतन्त्रताबुद्धिरेव नाविर्भवति। विधेयरूपेण वसन्नपि सा स्वतन्त्रा एव भूत्वा विराजते। वेदकालीनादर्शनारीसङ्कल्पः एवमुदात्तमासीत्। न बलात्कारेण न वा एकपक्षीयेन चर्यया पतिः पत्नीं परिपालितवान्। 'संजास्पत्यं सुयममाकृण्वन्देवाः' 4 - 10 - 85 - 23 'संजास्पत्यं सुयममाकृण्ष्व - 5 - 28 - 3 '- इत्यादि मन्त्रभागाः तदेव व्यक्तीक्रियन्ते। परस्पर- संरक्षणमेव पतिपत्न्योर्मिथः श्लाघनीय इति 'जाये दस्तं मघवन् सेदुयोनि' - 3 - 53 - 4 - इति मन्त्रे सूचितम्। गृहस्थस्य सर्वैश्वर्याणां कारणं गृहिणी एव। परस्पर- बहुमानादराणां निदर्शनाय इन्द्र-इन्द्राणीसंवादमत्रवर्णितम्। विहिसोरसृक्षत – 10-86-1. इन्द्राणिरेव मम सर्वाभ्युदयानां हेतुरिति इन्द्रः, इन्द्र ।ऽसुन्दरः निर्भयः प्रबलः इति इन्द्राण्या च उक्तम्। इदानीन्तनकाले दम्पत्योर्मिथः एतादृशी स्नेहबहुमानानि प्रायेण न दृश्यन्ते। यत्र एतानि सन्ति तत्र सन्तोषमप्यस्ति। रथस्य चक्रद्वयमिव, जीवितलक्ष्ये दम्पत्योः प्रयाणं सहैव कर्तव्यम्। यज्ञानुष्ठाने एतदेव सुन्दरतया उपवर्णितम्।

वेदकालीन - एतादृशी - सामाजिकीव्यवस्थायाः पुनरुज्जीवनेन समाजे इदानीं जायमानानाम् अस्वस्थानां तथा बन्धशिथिलीकरणानां परस्परविरुद्धताप्रतीतीनां च क्षयः भविष्यत्येव। परस्परं कलहायमानानां दम्पतीनां श्रद्धाऽस्मिन् विषये अवश्यं विधेयम्। यतः स्त्रीणाम् अलंकारभूतात्तमातृत्वभावनायाः संवर्धिता शिशवः एव सदाचारनिरताः सन्तः सत्यधर्मादिषु श्रद्धां कुर्वन्ति - ऋग्वेदे उक्तं - यत् माता स्वपुत्राया बुद्धिं वस्त्रं निर्मातीति – 5 - 47 - 6 - छान्दोग्योपनिषदि चतुर्थाध्याये चतुर्थखण्डे जबाला नाम माता स्वपुत्रं सत्यकामं सत्यं कथयितुं प्रवर्तयति – विद्याभ्यसनाया गुरोराश्रमगमनवेलायां स्वगोत्रनाम किमिति पृष्टं पुत्रं प्रति सा उवाच – गृहकर्मव्यापृताऽहं तव गोत्रं किमिति न जानामि। जबाला मम नाम, तव नाम च सत्यकामो भवति। अतः स्व नाम जबाला सत्यकामा इति कथय इति एवमुक्तं तं स्वशिष्यत्वेन गुरुणा स्वीकृतं च। स्वपुत्रस्य शिक्षणविषये मातुः औत्सुक्यमपि तत्र प्रकटितम्।

तदानीन्तने काले भौतिकोन्नमनं न केवलं विद्याभ्यासलक्ष्यमासीत्। किन्तु भौतिकोत्कर्षादधिकमात्मीयोत्कर्षस्यैवप्राधान्यं दत्तमासीत्। मनुष्याणां सर्वतोमुखीं अभिवृद्धिं लक्ष्यीकृत्यैव शिक्षणव्यवस्था स्थापिता। शिशूनां कृते गृहमेव प्राथमिकी पाठशाला भवति। माता एव सन्ततेः प्रथमगुरुः। शिक्षिता नार्य एव मानव समाजोद्धरणे समर्थाः। नारीशिक्षायाः प्रसार एव वास्तविकः शिक्षाप्रसारः, तेनैव समाजस्य बहुमुखी प्रगतिः सम्भवितुमर्हति। –' सहस्रं तु पितॄन् माता गौरवेणातिरिच्यते' इति प्रमाणानुसारेण बालकबालिकानां शिक्षणं, गार्हस्थ्यकार्याणां समुचितरूपेण सम्पादनं च स्त्रीभिः करणीयम्। यदि माता व्यवहारे दक्षा तथा शिशवोऽपि वार्तायां व्यवहारे दैनिककार्येषु च दक्षा भवन्ति। समाजस्य उन्नमनाय एतद् उपकरोति। गृहकार्ये निपुणाः ते गृहे शान्ति, सुव्यवस्था, समृद्धिः सुखञ्च दातुं शक्नुवन्ति। यदि गृहं सुखशन्तिपूर्णं न भवेत् तदा मानवेन शन्तिः न लभ्येत। तदा राष्ट्रेऽपि शन्तिः न लभ्येत। मातृसम्पर्केणोत्पन्नः संस्काराः यावज्जीवनं स्थायिनो भवन्ति। भारतदेशस्य गार्हस्थ्यजीवनेऽन्तः स्त्रीवैशिष्ट्यं अवतिष्ठते। अत एवोक्तं – न गृहं गृहमित्याहुः गृहिणी गृहमुच्यते' इति। समाजस्यौन्नत्यप्रापणे प्रेरिका सहायिकाश्च भवन्ति आदर्शमहिलाः। नार्युन्नतिमाश्रित्यैव राष्ट्रोन्नतिः सम्भवति। यदि नार्यः स्वार्थपरा बर्हिमुखाश्च भवन्ति तर्हि समाजस्यापि दुरवस्था सम्भवति। तन्निवारणार्थं अधिभौतिकशिक्षणेन सह आध्यात्मिकशिक्षणमपि दातव्यम्। तदर्थम् अनादिभूतानां अमृतनिष्यन्दीनां वेदादीनामध्ययनम् अवश्यं करणीयम्।

एवं आदर्शमातृरूपेण आदर्शपत्नीरूपेण स्त्रीभिः पुरुषाणां मार्गदर्शनं कृत्वा राष्ट्रकल्याणार्थम् आधारशिलारूपेण च वर्तनीयम्।